# Ribhuproktam Aham Brahmaikatvanirupanam

# ઋભુપ્રોક્તં અહં બ્રહ્મૈકત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Aham Brahmaikatvanirupanam

File name : RRibhuproktaMahaMbrahmaikatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 19| 19-37||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં અહં બ્રહ્મૈકત્વનિરૂપણમ્

(અહં બ્રહ્મૈકમાત્રત્વાત્)

પરં બ્રહ્માહમેવાદ્ય પરં બ્રહ્માહમેવ હિ ।
અહમેવ હિ તૃપ્તાત્મા અહમાનન્દવિગ્રહઃ ॥ ૧૯.૧૯॥

અહં બુદ્ધિઃ પ્રવૃદ્ધાત્મા નિત્યં નિશ્ચલનિર્મલઃ ।
અહમેવ હિ શાન્તાત્મા અહમાદ્યન્તવર્જિતઃ ॥ ૧૯.૨૦॥

અહમેવ પ્રકાશાત્મા અહં બ્રહ્મૈવ કેવલમ્ ।
અહં નિત્યો ન સન્દેહ અહં બુદ્ધિઃ પ્રિયઃ સદા (બુદ્ધિપ્રિયઃ સદા)॥ ૧૯।૨૧॥

અહમેવાહમેવૈકઃ અહમેવાખિલામૃતઃ ।
અહમેવ સ્વયં સિદ્ધઃ અહમેવાનુમોદકઃ ॥ ૧૯.૨૨॥

અહમેવ ત્વમેવાહં સર્વાત્મા સર્વવર્જિતઃ ।
અહમેવ પરં બ્રહ્મ અહમેવ પરાત્પરઃ ॥ ૧૯.૨૩॥

અહઙ્કારં ન મે દુઃખં ન મે દોષં ન મે સુખમ્ ।
ન મે બુદ્ધિર્ન મે ચિત્તં ન મે દેહો ન મેન્દ્રિયમ્ ॥ ૧૯.૨૪॥

ન મે ગોત્રં ન મે નેત્રં ન મે પાત્રં ન મે તૃણમ્ ।
ન મે જપો ન મે મન્ત્રો ન મે લોકો ન મે સુહૃત્ ॥ ૧૯.૨૫॥

ન મે બન્ધુર્ન મે શત્રુર્ન મે માતા ન મે પિતા ।
ન મે ભોજ્યં ન મે ભોક્તા ન મે વૃત્તિર્ન મે કુલમ્ ॥ ૧૯.૨૬॥

ન મે જાતિર્ન મે વર્ણઃ ન મે શ્રોત્રં ન મે ક્વચિત્ ।
ન મે બાહ્યં ન મે બુદ્ધિઃ સ્થાનં વાપિ ન મે વયઃ ॥ ૧૯.૨૭॥

ન મે તત્ત્વં ન મે લોકો ન મે શાન્તિર્ન મે કુલમ્ ।
ન મે કોપો ન મે કામઃ કેવલં બ્રહ્મમાત્રતઃ ॥ ૧૯.૨૮॥

કેવલં બ્રહ્મમાત્રત્વાત્ કેવલં સ્વયમેવ હિ ।

ન મે રાગો ન મે લોભો ન મે સ્તોત્રં ન મે સ્મૃતિઃ ॥ ૧૯.૨૯॥

ન મે મોહો ન મે તૃષ્ણા ન મે સ્નેહો ન મે ગુણઃ ।
ન મે કોશં ન મે બાલ્યં ન મે યૌવનવાર્ધકમ્ ॥ ૧૯.૩૦॥

સર્વં બ્રહ્મૈકરૂપત્વાદેકં બ્રહ્મેતિ નિશ્ચિતમ્ ।
બ્રહ્મણોઽન્યત્પરં નાસ્તિ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૧૯.૩૧॥

બ્રહ્મણોઽન્યદિદં નાસ્તિ બ્રહ્મણોઽન્યદિદં ન હિ ।
આત્મનોઽન્યત્સદા નાસ્તિ આત્મૈવાહં ન સંશયઃ ॥ ૧૯.૩૨॥

આત્મનોઽન્યત્સુખં નાસ્તિ આત્મનોઽન્યદહં ન ચ ।
ગ્રાહ્યગ્રાહકહીનોઽહં ત્યાગત્યાજ્યવિવર્જિતઃ ॥ ૧૯.૩૩॥

ન ત્યાજ્યં ન ચ મે ગ્રાહ્યં ન બન્ધો ન ચ ભુક્તિદં (મુક્તિદમ્) ।
ન મે લોકં ન મે હીનં ન શ્રેષ્ઠં નાપિ દૂષણમ્ ॥ ૧૯.૩૪॥

ન મે બલં ન ચણ્ડાલો ન મે વિપ્રાદિવર્ણકમ્ ।
ન મે પાનં ન મે હ્રસ્વં ન મે ક્ષીણં ન મે બલમ્ ॥ ૧૯.૩૫॥

ન મે શક્તિર્ન મે ભુક્તિર્ન મે દૈવં ન મે પૃથક્ ।
અહં બ્રહ્મૈકમાત્રત્વાત્ નિત્યત્વાન્યન્ન કિઞ્ચન ॥ ૧૯.૩૬॥

ન મતં ન ચ મે મિથ્યા ન મે સત્યં વપુઃ ક્વચિત્ ।
અહમિત્યપિ નાસ્ત્યેવ બ્રહ્મ ઇત્યપિ નામ વા ॥ ૧૯.૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં અહં બ્રહ્મૈકત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૯। ૧૯-૩૭॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 19. 19-37..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Aham Brahmaikatvanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*